# Rajakrita Shankara Stuti

# રાજાકૃતા શઙ્કરસ્તુતિઃ

## Document Information

Text title : Rajakrita Shankara Stuti

File name : rAjAkRRitAshankarastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 21| 283-300||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# રાજાકૃતા શઙ્કરસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

રાજોવાચ

કૃતાર્થોઽસ્મિ મહાદેવ કૃતાર્થોઽસ્મિ મહેશ્વર ।
કૃતાર્થોઽસ્મિ હરાનન્ત કૃતાર્થોઽસ્મિ શિવાપતે ॥ ૨૮૩॥

નમસ્તે દેવદેવાય નમસ્તે શઙ્કરપ્રભો ।
નમસ્તે પાર્વતીનાથ નમસ્તે કરુણાકર ॥ ૨૮૪॥

નમસ્તે મુક્તિમન્દાર નમસ્તે ભક્તવત્સલ ।
નમસ્તે શર્વ સર્વેશ નમસ્તે પુરસૂદન ॥ ૨૮૫॥

નમસ્તે નીલકણ્ઠાય નમસ્તે નીલલોહિત ।
નમસ્તે ભગવચ્છમ્ભો નમસ્તે વૃષભધ્વજ ॥ ૨૮૬॥

નમસ્તે નિર્ગુણામેય નમસ્તે સગુણ પ્રભો ।
નમસ્તે નિષ્કલ શ્રીમન્ નમસ્તે શશિશેખર ॥ ૨૮૭॥

નમસ્તે ચન્દ્રચૂડાય નમસ્તે ભૂતિભૂષણ ।
નમસ્તે સર્પભૂષાય નમસ્તે શૂલપાણયે ॥ ૨૮૮॥

નમસ્તે વિશ્વરૂપાય નમસ્તે વિશ્વચક્ષુષે ।
નમસ્તે વિશ્વગર્ભાય નમસ્તે વિશ્વબાહવે ॥ ૨૮૯॥

નમોઽનન્તગુણાધાર નમો વિશ્વમ્ભરાય તે ।
નમઃખટ્વાઙ્ગહસ્તાય નમસ્તે પરમાત્મને ॥ ૨૯૦॥

નમસ્તે ભૂરિરૂપાય નમસ્તે ભૂરિતેજસે ।
નમો વિષ્ણ્વાદિવન્દ્યાય નમસ્તે સુરપૂજિત ॥ ૨૯૧॥

નમસ્તે દેવદેવેશ નમસ્તે સુરસત્તમ ।
નમસ્તે અસ્તુ ભગવન્નમો વિશ્વેશ્વરાય તે ॥ ૨૯૨॥

મહાદેવ નમસ્તેઽસ્તુ ત્રિયમ્બક નમોઽસ્તુ તે ।
નમસ્ત્રિકાગ્નિકાલાય નમસ્તે ત્રિપુરાન્તક ॥ ૨૯૩॥

નમઃ કાલાગ્નિરુદ્રાય મહારુદ્રાય તે નમઃ ।
નમસ્તે કાલરુદ્રાય નમઃ સર્વેશ્વરાય તે ॥ ૨૯૪॥

નમઃ પરમરૂપાય સદાશિવ નમોનમઃ ।
નમઃ શ્રીવિશ્વનાથાય વિષ્ણુનેત્રાર્ચિતાય તે ॥ ૨૯૫॥

નમો વન્દ્યાય વિશ્વાય શાશ્વતાય નમોનમઃ ।
નમો વેદાન્તવેદ્યાય નિર્મલાયામિતાત્મને ॥ ૨૯૬॥

નમસ્ત્રિશૂલહસ્તાય કન્દર્પદલનાય તે ।
નમો ડમરુહસ્તાય વિરાડ્રૂપાય તે નમઃ ॥ ૨૯૭॥

વિદારિતનૃસિંહ્માય સન્દગ્ધમદનાય તે ।
હૃતબ્રહ્મોત્તમાઙ્ગાય શમ્ભવે પ્રભવે નમઃ ॥ ૨૯૮॥

વિશ્વાકારાય વિશ્વાય નમસ્તે વિશ્વતસ્ત્વિષે ।
વિશ્વભર્ત્રે નમસ્તુભ્યં નમસ્તે વિશ્વમૂર્તયે ॥ ૨૯૯॥

અનન્તવિભવ શ્રીમન્ અપ્રમેયગુણાર્ણવ ।
અપરાધાન્ક્ષમસ્વેશ કરુણાસાગર પ્રભો ॥ ૩૦૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાકૃતા શઙ્કરસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૧। ૨૮૩-૩૦૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 21 . 283-300..

Proofread by Ruma Dewan

*Rajakrita Shankara Stuti*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*